**दिनाङ्क :- 01.08.2025**

**प्रात: - 06:55**

## मन्त्रिमण्डलम्

केन्द्रीयमन्त्रिमण्डलेन पञ्चदशतमस्य वित्तायोगचक्रस्य कालखण्डे प्रचलितायाः "प्रधानमन्त्री कृषि -संपदा-योजना" इति केन्द्रीयक्षेत्रयोजनायाः

कृते विंशत्यधिक-नवशतोत्तरैक सहस्रकोटिरूप्यकाणां अतिरिक्तव्ययेन सह विंशत्यधिकपञ्चशतोत्तर-षड्सहस्रकोटि-रूप्यकाणां परिव्ययस्य अनुमोदनं कृतम् अस्ति। ह्य: अपराह्णे नवदिल्ल्यां वार्ताहरैः सह भाषमाणः सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत्, एकीकृतशीत-शृङ्खला तथा मूल्यवर्धन-अवसंरचनायाः अन्तर्गतं पञ्चाशत् बहूत्पादखाद्य-विकिरण-घटकानां स्थापनार्थं एकसहस्रकोटिरूप्यकाणां साहाय्यम् अनुमोदितम्।

## ज्योतिरादित्य सिन्धिया

केन्द्रीयसञ्चारमन्त्री ज्योतिरादित्य सिन्धिया अवदत् यत् एलोन् मस्क इत्यस्य नेतृत्वे स्टार्लिङ्क् इत्यनेन भारते उपग्रह-अन्तर्जाल-सेवायाः प्रक्षेपणस्य अनुज्ञापत्रं प्राप्तम् सममेव सुगमतया प्रक्षेपणार्थं वर्णपट-आबंटनस्य संरचना अपि प्रचलिता इति। नव-दिल्ल्यां दूरभाषस्य त्रिंशत् वर्षाणां सम्मेलनस्य अवसरे सम्मेलनम् अभिसंबोधनं कुर्वन् मन्त्री अवोचत् यत् गत एकादश वर्षेषु भारतस्य अंकीय यात्रा असाधारणम् अस्ति। सः एतदपि अवोचत् यत् गतदशके दूरस्थग्रामात् मेट्रो-नगरपर्यन्तं अंकीय-प्रवेशः नागरिकान् सशक्तं अकुर्वन्।

## निर्वाचनायोगेन 'विशेष-पुनरीक्षण

निर्वाचनायोगेन 'विशेष-पुनरीक्षण-प्रयोजनस्य अन्तर्गतं बिहारराज्ये निर्वाचननामावलिप्रारूपस्य प्रकाशनं अद्य क्रियते। निर्वाचननामावलिप्रकाशनात् पूर्वं मुख्यनिर्वाचनायुक्तेन ज्ञानेशकुमारेन प्रदत्ते सन्देशे उक्तं यत्– बिहारस्य त्रिचत्वारिंशदधिक द्विशत निर्वाचनाधिकारिणः मतदातॄन् राजनीतिकपक्षान् च आमन्त्रणं कुर्वन्ति ये नामावल्यां दृश्यमानानां दोषानां विषये आक्षेपं दातुं शक्नुवन्ति। एवमेव एते आक्षेपाः आगस्त प्रथमतः प्रथमसप्तम्बरपर्यन्तम् दातु शक्यन्ते। निर्वाचन-मण्डलेन पुनः प्रतिपादितं यत् विद्युत्मतदानयन्त्राणि छेदनरहितानि सन्ति इति। तथा च उक्तं यत्– गतवर्षे सम्पन्ने महाराष्ट्रविधानसभानिर्वाचने **VVPAT** चीटिकानां गणनायां कोऽपि भेदः न दृष्टः। इति

**संसद**

बिहारराज्ये निर्वाचक-सूच्यां विशेष-गहन-संशोधनस्य विषये चर्चायाः याचनार्थं विपक्षदलानां कोलाहलात् परं ह्य: संसद: उभयसभे स्थगिते। लोकसभा द्विवारं, राज्यसभा च त्रिवारं तिरोहितम्।

**बैङ्किङ्ग्-विधिः (संशोधनम्) अधिनियमः**

बैंकिंग क्षेत्रे शासनमानकं वर्धयितुं, निक्षेपकेभ्यः निवेशकेभ्यः च वर्धितसंरक्षणं सुनिश्चेतुं च पंचविशत्युत्तर द्विसहस्र तम वर्षस्य बैङ्किङ्ग्-विधिः (संशोधनम्) अधिनियमः, अद्य प्रवृत्तः भविष्यति। वित्तमन्त्रालयः अवोचत् यत् अस्मिन् वर्षे अप्रैल मासस्य पंचदश दिनाङ्के अधिसूचितः अयं अधिनियमः सार्वजनिकक्षेत्रस्य बैङ्क् इत्येतेषु लेखागुणवत्तां वर्धयितुं, सहकारी-बैङ्क् इत्येतेषु (अध्यक्षं पूर्णकालिकनिर्देशकं च विहाय) निदेशकाणां कार्यकालं वर्धयितुं च प्रयतते।

**भारतीय ऋतु विभागेन**

भारतीय ऋतुविज्ञान विभागेन अद्य असम , मेघालय, अरुणाचलप्रदेशेषु प्रचण्डतः अतिप्रचण्डपर्यन्तं वर्षायाः कृते नारङ्गीया सूचना दत्ता । बिहारे, छत्तीसगढे, हिमाचलप्रदेशे, झारखण्डे, नागालैण्ड्-राज्ये, मणिपूरे मिजोरम्-राज्ये, त्रिपुरा-राज्ये, राजस्थाने उत्तराखण्डे, पश्चिमवङ्गे, सिक्किमे च अद्य प्रचण्डवृष्टिः भविष्यति इति विभागेन पूर्वानुमानं प्रकटितम्।

**भारतीय-महिला/ च्याम्पियन्शिप्**

पंचविशत्युत्तर द्विसहस्र तमवर्षस्य यू-सप्तदश विश्व-मल्लयुद्ध-च्याम्पियन्शिप्-क्रीडायां भारतीय-महिला-मल्लयुद्ध-क्रीडकाः ह्यः अथेन्स्-नगरे प्रभावपूर्णं प्रदर्शनं आचरितवत्य:। द्वे स्वर्णपदके, द्वे रजतपदके, एकं कांस्यपदकं च मिलित्वा आहत्य पञ्चपदकानि प्राप्तवत्यः। ऐतिहासिकस्य अभियानस्य आरम्भः रचनया अभवत्, या चीनदेशस्य जिन् हुआङ्ग् त्रिणी- शून्यं अङ्कैः प्रबलेन विजयेन महिलानां त्रिचत्वारिंशत् कि. ग्रा. वर्गे भारतस्य प्रथमं स्वर्णपदकं प्राप्तवती।